# श्रीरामाष्टकम्

कृतार्तदेववन्दनं दिनेशवंशनन्दनम् ।
सुशोभिभालचन्दनं नमामि राममीश्वरम् ।।१।।
मुनीन्द्रयज्ञकारकं शिलाविपत्तिहारकम् ।।
महाधनुर्विदारकं नमामि राममीश्वरम् ।।२।।
स्वतातवाक्यकारिणं तपोवने विहारिणम् ।
करे सुचापधारिणं नमामि राममीश्वरम् ।।३।।
कुरंङ्गमुक्तसायकं जटायुमोक्षदायकम् ।
प्रविद्धकीशनायकं नमामि राममीश्वरम् ।।४।।
प्लवङ्गसङ्गसम्मतिं निबद्धनिम्नगापतिम् ।
दशास्यवंशसतिंङ्क्षतिं नमामि राममीश्वरम् ।।५।।
विदीनदेवहर्षणं कपीप्सितार्थवर्षणम् ।
स्वबन्धुशोककर्षणं नमामि रममीश्वरम् ।।६।।
गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम् ।
कृतास्तमोहलक्षणं नमामि राममीश्वरम् ।।७।।
हृताखिलाचलाभरं स्वधामनीतनागरम् ।
जगत्तमोदिवाकरं नमामि राममीश्वरम् ।।८।।
इदं समाहितात्मना नरो रघूत्तमाष्टकम् ।
पठन्निरन्तरं भयं भवोद्भवं न विन्दते ।।९।।

**इति श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं श्रीरामाष्टकं सम्पूर्णम्।**

**रामाष्टक स्तोत्र पाठ से लाभ**

जो भी भक्त इस रामाष्टक को एकाग्रचित्त से निरन्तर पाठ करता है उसे संसार जनित भय की प्राप्ति नहीं होती है।